लक्ष्यं विश्वमानम्

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 3rd Semester Examination, 2023-24

DINABANDHU MAHAVIDYALAYA Estd.-1947 CENTRAL LIBRARY

## SANACOR05T-SANSKRIT (CC5)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### SECTION-A

1. ***यथाभिमतमेकस्य*** प्रश्नस्य उत्तरं देयम्। 10×1 = 10

(क) भासकृते 'स्वप्नवासवदत्तमि'ति नाटके यौगन्धरायणस्य चरित्रस्य उपयोगिता लिख्यताम्।

(ख) भासप्रणीते स्वप्नवासवदत्तनाटके स्वप्नदृश्यस्य तात्पर्यं व्याख्यायताम्।

2. ***कस्यचिदेकस्य*** श्लोकस्य संस्कृतेन देवनागरीलिप्या च व्याख्यानं विधीयताम्। 5×1 = 5

(क) सुखमर्थो भवेद् दातुं सुखं प्राणाः सुखं तपः।
सुखमन्यद् भवेत् सर्वं दुःखं न्यासस्य रक्षणम्॥

(ख) कालक्रमेण जगतः परिवर्त्तमाना
चक्रारपङ्क्तिरिव गच्छति भाग्यपङ्क्तिः॥

3. अधोलिखितानां यथेच्छं ***पञ्च*** प्रश्नाः संस्कृतेन देवनागरीलिप्या च समाधेयाः। 2×5 = 10

(क) राज्ञ उदयनस्य मन्त्रिणौ कौ आस्ताम्?

(ख) महाकवेः भासस्य रामायणमूलकं नाटकद्वयं लिख्यताम्।

(ग) ब्रह्मचारी कुत्र किमर्थं उषितवान्?

(घ) को नाम न्यासः? स्वप्नवासवदत्तनाटके न्यासत्वेन कस्य चरित्रस्य उल्लेखः अस्ति?

(ङ) अङ्गारवती का आसीत्? केन सा परिणीता?

(च) 'स्वप्नवासवदत्तमि'ति विदूषकस्य नाम किम् आसीत्? कस्मिन् अङ्के तस्य प्रथमाविर्भावः आसीत्?

(छ) 'भर्तृस्नेहात् सा दग्धाप्यदग्धा' – कस्य उक्तिरियम्? इत्यत्र अदग्धा का?

(ज) 'स्वप्नवासवदत्तमि'ति नाटकस्य 'भरतवाक्यम्' लिख्यताम्।

## SECTION-B

4. ***यथाभिमतमेकस्य*** प्रश्नस्य उत्तरं संस्कृतेन देवनागरीलिप्या च देयम्। 10×1 = 10

(क) शकुन्तलां प्रति दुर्वाससः शापः कः आसीत् ? 'अभिज्ञानशकुन्तलमि'ति नाटके दुर्वाससः अभिशापवृत्तान्तस्य तात्पर्यं विवृणुत। 2+8

(ख) महाकविकालिदासेन प्रणीतस्य 'अभिज्ञानशकुन्तलमि'ति नाटकस्य राज्ञः दुष्यन्तस्य चरित्रवर्णनं कुरुत। 10

(ग) 'कालिदासस्य सर्वस्वमभिज्ञानशकुन्तलम्' – इत्यस्य कविप्रशस्तिवाक्यस्य तात्पर्यं लिखत। 10

5. यथेच्छं ***त्रयाणां*** श्लोकानां संस्कृतेन देवनागरीलिप्या च व्याख्यानं विधीयताम्। 5×3 = 15

(क) गच्छति पुरःशरीरं धावति पश्चादसंस्थितं चेतः।
चीनांशुकमिव केतोः प्रतिवातं नीयमानस्य॥

DINABANDHU MAHAVIDYALAYA Estd.-1947 CENTRAL LIBRARY

(ख) अर्थो हि कन्या परकीय एव तामद्य संप्रेष्य परिग्रहीतुः।
जातो ममायं विशदः प्रकामं प्रत्यर्पितन्यास इवान्तरात्मा॥

(ग) इदं किलाव्याजमनोहरं वपुस्तपक्षमं साधयितुं य इच्छति।
ध्रुवं स नीलोत्पलपत्रधारया शमीलतां छेत्तुमृषिर्व्यवस्यति॥

(घ) चित्रे निवेश्य परिकल्पितसत्त्वयोगा
रूपोच्चयेन मनसा विधिना कृता नु।
स्त्रीरत्नसृष्टिरपरा प्रतिभाति सा मे
धातुर्विभुत्वमनुचिन्त्य वपुश्च तस्याः॥

(ङ) मानुषीषु कथं वा स्यादस्य रूपस्य सम्भवः।
न प्रभातरलं ज्योतिरुदेति वसुधातलात्॥

**अथवा**

अधोलिखितेषु यथेच्छं ***त्रयाणां*** टिप्पणी संस्कृतेन देवनागरीलिप्या च लेख्या। 5×3 = 15

(क) हंसपदिका (ख) माधव्यः (ग) नान्दी (घ) अनसूया (ङ) सानुमतिः

——×——